# संस्कृतभाषा इहपरकल्याणसाधिका

**डा. तिरुमल**

सहप्राध्यापक: -सुरानमहाविद्यालय:, बसवनगुडि-बेङ्गलूरु

DOI: https://doi.org/10.5281/zenodo.15796332

## ABSTRACT:

**शोधपत्रप्रविधि:**

**उत्तरं यत्समुद्रस्यहिमाद्रेश्चैव दक्षिणम् । वर्षं तद्भारतं नामभारती यत्र सन्तति: ॥**

इह खलु जगति सत्सु बहुषु जीविषु मानव: मानवेतरजीविभ्य: भिन्न: उन्नतस्तरस्थश्च पशुपक्षिक्रिमिकीटेषु इव

वर्तमानस्वाभाविकज्ञानेन तृप्तेरभावात् । अत एवोच्यते- **आहारनिद्रा भयमैथुनञ्च सामान्यमेतत्पशुभिर्नराणाम् ।**

**धर्मो हि तेषामधिको विशेष: धर्मेण हीना: पशुभि: समाना: ॥**

जिज्ञासाहेतो: नैमित्तिकज्ञानावाप्तौ समर्थ: तेन सर्वाङ्गीणविकासश्च । परं नैमित्तिकज्ञानन्तु लभते गुरु-ज्येष्ठानां

शुश्रूषया, ऋषिमुनिभि:, विद्वद्भि: विविधघटनदर्शन-श्रवणेन । किन्तु गम्भीरदृष्ट्या अवलोकनेन

ईदृशनैमित्तिकज्ञानम् इन्द्रियगम्यभौतिकवस्तुमात्रेषु सञ्चरति न तु परमात्म-जीवात्म-बन्ध-मोक्ष-

धर्माद्यतीन्द्रियतत्वस्पर्शने । अतीन्द्रियज्ञानाश्रयकदिव्यज्ञानं परिपूर्णविकासे अनिवार्यम् । आध्यात्मिक-

वैदिकयुगस्य मानवा: जीवनधारणाय धर्मम् आचरन्ति स्म । कोऽयं धर्म: ? **यतोऽभ्युदयनि:श्रेयस: सिद्धि: स धर्म:**

**। यतो हि धर्मो विश्वस्य जगत: प्रतिष्ठा । धर्मेण पापमपनुदति । लोके धर्मिष्ठं प्रजा उपसर्पन्ति । इति च श्रुति: ।**

## KEYWORDS:

संस्कृतभाषा, कल्याणसाधिका, वेद:, विद्या.

## शोधपत्रम्

**उत्तरं यत्समुद्रस्य हिमाद्रेश्चैव दक्षिणम् । वर्षं तद्भारतं नाम भारती यत्र सन्ततिः ॥१**

इह खलु जगति सत्सु बहुषु जीविषु मानवः मानवेतरजीविभ्यः भिन्नः उन्नतस्तरस्थश्च पशुपक्षिक्रिमिकीटेषु इव

वर्तमानस्वाभाविकज्ञानेन तृप्तेरभावात् । अत एवोच्यते- आहारनिद्रा भयमैथुनञ्च सामान्यमेतत्पशुभिर्नराणाम् ।

धर्मो हि तेषामधिको विशेषः धर्मेण हीनाः पशुभिः समानाः ॥२

जिज्ञासाहेतोःनैमित्तिकज्ञानावाप्तौ समर्थःतेन सर्वाङ्गीणविकासश्च । परं नैमित्तिकज्ञानन्तु लभते गुरु-ज्येष्ठानां

शुश्रूषया, ऋषिमुनिभिः, विद्वद्भिः विविधघटनदर्शन-श्रवणेन । किन्तु गम्भीरदृष्ट्या अवलोकनेन

ईदृशनैमित्तिकज्ञानम् इन्द्रियगम्यभौतिकवस्तुमात्रेषु सञ्चरति न तु परमात्म-जीवात्म-बन्ध-मोक्ष-

धर्माद्यतीन्द्रियतत्वस्पर्शने । अतीन्द्रियज्ञानाश्रयकदिव्यज्ञानं परिपूर्णविकासे अनिवार्यम् । आध्यात्मिक-

वैदिकयुगस्य मानवाः जीवनधारणाय धर्मम् आचरन्ति स्म । कोऽयं धर्मः ? ३ यतोऽभ्युदयनिःश्रेयसः सिद्धिः स

धर्मः । यतो हि धर्मो विश्वस्य जगतः प्रतिष्ठा । धर्मेण पापमपनुदति । लोके धर्मिष्ठं प्रजा उपसर्पन्ति ४ इति च

श्रुतिः ।

व्यवहारः भाषाद्वारा एव सिध्यति । भाषां विना स्वस्याभिप्रायं अन्येभ्यः ज्ञापयितुमसमर्थो भवति । भाषारहितं

जगत् गाढान्धकारे पतति । भाषया अस्माकं ज्ञानं वर्धते संवर्धते । आध्यात्मिकभौतिकयोः विकासे पूर्णं निर्दोषं

भवति दिव्यनैमित्तिकज्ञानम् । दिव्यनैमित्तिकज्ञानस्य अमूल्यनिधिः

वेदाद्यखण्डभण्डारयुक्ता विद्यते

इहपरकल्याणसाधिका संस्कृतभाषा इत्यत्र नास्ति संशयलेश: । संस्कृतवाङ्मयम् मानवस्य न केवलं

भौतिकोत्कर्षम् अधिकृत्य विचारान् प्रस्तौति, अपि तु पारलौकिकान् विचारान् अपि, प्रतिपादयति ।

विश्वे विद्यमानासु भाषासु श्रेष्ठतमाया: संस्कृतभाषाया: देववाणी सुरभाषा गीर्वाणवाणी सन्ति नामानि । अस्या:

साहित्यं विपुलं गम्भीरं सरसञ्च । संस्कृताध्ययनेन आध्यात्मिकज्ञानं भौतिकविज्ञानम् उद्योगकलादिविद्या:

मानवजीवननिर्वहणाय प्राप्तुं शक्यते । चरक-सुश्रुतसंहिताद्यायुर्वेदग्रन्थेषु रोगनिदानं कायचिकित्सा

शस्त्रचिकित्सादय: सुस्पष्टं वर्णिता: । पतञ्जलिमहर्षे: योगशास्त्रं मनस: स्वास्थ्यस्य च मार्गं दर्शयति । संस्कृते

पारलौकिकविषया: सर्वत्र संदृश्यन्ते । अस्य मूलस्रोत: आध्यात्मिकविचार: । मानवजीवनस्य सार्तकाताप्राप्त्यर्थं

आवश्यका: धार्मिकनैतिकांशा: राजनैतिकादिविशिष्टांशा: पुराणस्मृत्यादिग्रन्थेषु वेदकालादेव संसूचिता: वर्तन्ते ।

न केवलं भारतीया: विदेशीया: अपि संस्कृताभ्यासं कुर्वन्ति ।

संस्कृतभाषा सर्वज्ञानशेवधि: । प्राचीनभारते विपुलेऽस्मिन् संस्कृतवाङ्मये मानवजीवनस्य संरक्षणाय संवर्धनाय

विश्वकल्याणाय च सर्वेऽप्युपाया: अस्माकमृषिभि: शास्त्रकारैश्च सविस्तरं निरूपिता वर्तन्ते इति तु निश्चप्रचम् ।

तत्र केवलं महाभारतविषये एव यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित् ५ दृश्यते प्रसिद्धोक्ति: । विस्तृते

सागरोपमे सत्यस्मिन् कल्याणकारिणि संस्कृतवाङ्मये निदर्शनमात्रेण संसूच्यते इहपरकल्याणकृद्विचारा:

जलबिन्दुरूपेण ।

मनुष्यस्य प्रत्येकस्मिन् स्तरे गर्भाधानादारभ्य संस्कार: अत्यवश्यक: । संस्कारज्ञानरहितस्य जन्म निरर्थकं

सस्यवदिव । स्कन्दपुराणोक्ति: स्पष्टयति विचारमेनम्- जन्मना जायते शूद्र: संस्काराद्विज उच्यते ।

वेदाभ्यासाद्भवेद्विप्रो ब्रह्मज्ञानाच्च ब्राह्मण: ॥६ किञ्च जातस्य वै मनुष्यस्य द्वौ संस्कारौ ऋणभूतौ भवत: ।

जातसंस्कारेणेमं लोकं मृतसंस्कारेणामुं लोकमभिजयति ।

अस्य महतो भूतस्य नि:श्वसितमेतद्यदृग्वेदो यजुर्वेद: सामवेदोऽथर्वाङ्गिरस: ७ इत्यादिवचनै: प्रसिद्ध: परमेश्वरस्य

वाङ्मयविभूतिरूप: वेद एव विश्वमान्याया: भारतीयसनातनार्षसंस्कृतिपरम्पराया: प्राण इति सुविदितमेवैतत् ।

द्रढयति अमुमेव विचारं व्यासमहर्षे: वचनम्-

अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा । आदौ वेदमयी विद्या यत: सर्वा प्रवृत्तय: ॥८

कोऽयं वेद: ?

प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते । एवं विदन्ति वेदेन तस्माद्वेदस्य वेदता ॥ ९

इष्टप्राप्त्यनिष्टपरिहारयो: योऽलौकिकमुपायं वेदयति स वेद: । १० अपौरुषेयं वाक्यं वेद: न केनापि विरचितात् ।

गुह्यं ब्रह्म तदिदं वो ब्रवीमि न मानुषात् श्रेष्ठतरं हि किञ्चित् ११ इति व्यासोक्तिप्रकारेण

आचार्यभगवत्पादशङ्करोक्तिरिव च कोटिकोटिजन्मसुकृतै: लब्धस्य मानवजन्मन:

धर्मार्थकाममोक्षाख्यपुरुषार्थचतुष्टयसम्पत्तिसंस्कृतजीवनधन्यता साफल्याय प्रवर्तते स: वेद:

नित्यानित्यज्ञानाज्ञानधर्माधर्मादिद्वन्द्वदूषितप्रपञ्चे । किञ्च वेदोऽखिलो धर्ममूलम् १२ । अत एव जोघुष्टमस्ति

आचार्यशङ्करभगवत्पादै: वेदो नित्यमधीयतां तदुदितं कर्मस्वनुष्ठीयताम् १३ इति । जटा माला शिखा रेखा

ध्वजो दण्डो रथो घन: । अष्टौ विकृतय: प्रोक्ता: क्रमपूर्वा महर्षिभि: ॥ १४ इत्येवं विकृतिनाम्ना महर्षिभि:

प्रकल्पितैरष्टभिरुपायै: वरीवर्ति चाविच्छन्नया गुरुशिष्यपरम्परया गुररुकुलाध्ययनक्रमयुक्तो वेदाङ्गै: शास्त्रैश्च सह

वेदाध्ययनसम्प्रदाय: । प्रभुसंहिताया: वेदस्स्य अध्ययनानानुकूले मित्रसंहता पुराणानि प्रादुरभवन् व्यासानुग्रहेण ।

न केवलं अध्ययनमात्रेणैव पुरुषार्थसिद्धि: अपि तु विधिनियमाणुसार्ण निस्वार्थतया कर्म कुर्यात् । न

कर्मणामनारम्भान्नैशषकर्म्यं पुरुषोऽश्नुते । न च सन्यसनादेव सिद्धिं समधिगच्छति ॥ १५ कर्मणि निष्ठा भवतु फले

आसक्ति: मास्त्विति गीतोपदेश: । कर्मण्येवाधिकारस्ते मा फलेषु कदाचन । मा कर्मफलहेतुर्भूर्मा ते

सङ्गोऽस्त्वकर्मणि ॥ १६ विना शास्त्रविधिं कामकारत: य: कर्म करोति तत्र कर्मसिद्धिं सुखं नास्ति । य:

शास्त्रविधिमुत्सृज्य वर्तन्ते कामकारत: । न स सिद्धिमवाप्नोति न सुखं न परां गतिम् ॥ १७

लोकहिताय च पुराणविषये अत्यमूल्यसन्देश: संश्रूयते । अष्टादाशपुराणेषु व्यासस्य वचनद्वयम् । परोपकार:

पुण्याय पापाय परपीडनम् ॥ १८ पुराणज्ञानावाप्तौ अशक्तेभ्य: रमणीयानि काव्यानि विरचितानि आर्षकविभि:

कान्तासम्मिततया उपदेशाय । एवं आचार्यै: विद्वद्भिश्च स्तोत्राणि गीतानि लोकहिताय सन्ति रचितानि ।

प्रथमे नार्जिता विद्या द्वितीये नार्जितं धनम् । तृतीये नार्जितो धर्म: चतुर्थे किं करिष्यति ॥ १९ मनुमहर्षि:

जीवनस्य ब्रह्मचर्यावस्थायां क्षणस्यापि उपयोगेन विद्यां साधयेत्

। गृहस्थाश्रमकाले अनुपयोगे विना कणत्यागं

सत्सम्पदोऽर्जयाम: । तृतीयस्तरे यथाशक्ति धर्मं सम्पादयाम: । चतुर्थे वृद्धाप्ये उपनिषदादिप्रस्थानत्रये

संसूचितात्मविद्यामार्गे सत्यान्वेषणे भगवद्भक्त्या भगवदुपासनया परमात्मसायुज्यं मोक्षं साधयाम: इति

मुक्तकण्ठ: सङ्गदति ।

आचार्यात्पादमादत्ते पादं सब्रह्मचारिभ्य: । पादं शिष्य: स्वमेधया पादं कालक्रमेण तु ॥ २०

संसारे कालानुसारि ज्ञानसम्पादनं कथं भवेत् । प्रथमे विद्यार्थिजीवने गुरो: मार्गदर्शनेन पादमात्रं ज्ञानमवाप्नोति ।

सहपाठिभि: चर्चापूर्वकाध्ययनेन अग्रिमपादमात्रं, इतोऽपि पादभागप्रमाणं स्वाध्यायचिन्तनेन, अवशिष्टपादमात्रं

कालक्रमे साधयति अध्ययनशील: केवलम् ।

विश्वं भवत्येकनीडम् २१ इति श्रुते: स्वार्थं विना प्रसन्नमनस्क: जीवनं साधयेत् । अयं निज: परो वेति गणना

लघुचेतसाम् । उदारचरितानां तु वसुधैव कुटुम्बकम् ॥ अनुद्वेगतया कार्यं कुर्यात् इति आम्नाय: बोधयति प्रसन्नात्मा

चिरं जीवति २२ । पुनश्च सन्ध्याकाले ध्यानेन प्रार्थनया भजनेन मनस: प्रसन्नतां संसाध्य सकलं मङ्गलमवाप्नुयात्

इति श्रुति: जागर्ति अस्मान् । उद्यन्तमस्तंयन्तमादित्यमभिध्यायन् कुर्वन्ब्राह्मणो विद्वान् सकलं भद्रमश्नुते २३ ।

यतो हि मन एव मनुष्याणां कारणं बन्धमोक्षयो: २४ । य: गौरवादरेण व्यवहरति स: आरोग्यं बलं ज्ञानं यशश्च

सम्प्राप्नोति ।

अभिवादनशीलस्य नित्यं वृद्धोपसेविन: । चत्वारि तस्य वर्धन्ते आयुर्विद्यायशोबलम् ॥ २५

इत्थं संस्कृतभाषा इहपरकल्याणसाधिकाप्रतिपादने विचारा:

नान्ता: इति विस्तराद्विरम्यते ।

सर्वे भवन्तु सुखिन: सर्वे सन्तु निरामय्: । सर्व् भद्राणि पश्यन्तु मा कश्चिद्दु:खभाग्भवेत् ॥

**Reference:**

1. विष्णुपुराणम्
2. हितोपदेश:
3. वैशेषिकदर्शनम्
4. महानारायणोपनिषत्
5. महाभारतम्-स्वर्गारोहणपर्व-५-५०
6. स्कन्दपुराणम्- नागरखण्ड: अध्याय:- 239 : श्लोक 31
7. तैत्तिरीयारण्यकस्य पीठिका
8. महाभारतम्- शान्तिपर्व-१३१.५६
9. वेदभाष्यम्
10. तैत्तिरीयारण्यकस्य पीठिका
11. महाभारतम्- शान्तिपर्व-
12. मनुस्मृति:,
13. साधनापञ्चकम्
14. प्रातिशाख्यम्
15. श्रीमद्भगवद्गीता-३ अध्याय:
16. श्रीमद्भगवद्गीता-२ अध्याय:,
17. श्रीमद्भगवद्गीता-१६ अध्याय:
18. राघवयादवीयम्,
19. मनुस्मृति:
20. आपस्तम्बधर्म सूत्र 7/29

21. महानारायणोपनिषत्
22. श्रीवैखानसगृह्यसूत्रम्,
23. सहवैमन्त्रभाग:
24. अमृतबिन्दुपनिषद्, ६/३४
25. मनुस्मृति:

**Funding:**
This study was not funded by any grant.

**Conflict of interest:**
The Authors have no conflict of interest to declare that they are relevant to the content of this article.

**About the License:**
© The Authors 2024. The text of this article is open access and licensed under a Creative Commons Attribution 4.0 International License.